"प्रतिश्रुतं सत्यं कृतमिति हृष्टाः प्रथमं सत्यत्वेन स्तुवन्ति सत्यव्रतमिति। सत्यं व्रतं सङ्कल्पो यस्य। सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्व्वं प्रलयानन्तरं स्थितिसमये च सत्यं अव्यभिचारेण वर्त्तमानम्। तत एवाहुः। सत्यस्य योनिमिति। सच्छब्देन पृथिव्यप्तेजांसि। त्यशब्देन वाय्वाकाशौ। एवं सच्च त्यच्च सत्त्वं भूतपञ्चकम्। तं सत्यमित्याचक्षते इति श्रुतेः। तस्य योनिं कारणं अनेन सृष्टेः पूर्व्वं वर्त्तमानतोक्ता। तथा सत्ये तस्मिन्नेव निहितं अन्तर्य्यामितया स्थितं अनेन स्थितिसमये च सत्यत्वमुक्तम्। तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं नाशेऽपि अवशिष्यमानं रूपं अनेन प्रलयेऽप्यवधित्वेन सत्यत्वं दर्शितं एवं त्रिसत्यत्वमुपपादितम्। तथा ऋतसत्यनेत्रम्। ऋतञ्च सूनृता वाणी सत्यञ्च समदर्शनम्। तथा भगवता व्याख्यास्यमानत्वात् सत्यञ्च समदर्शनमिति ऋतञ्च सूनृता वाणी कविभिः परिकीर्त्तिता॥ इति तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्त्तकमिति यावत्। एवं सर्व्वप्रकारेण सत्यात्मकं त्वां वयं शरणं प्रपन्ना इत्यर्थः।" इति श्रीधरस्वामी ॥*॥ अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ नान्दीमुखश्राद्धदेवः। यथा,

"इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः।
नैमित्तिके कालकामौ काम्ये च धुरिलोचनौ॥"
इति श्राद्धतत्त्वम्॥*॥

(मुनिविशेषः। यथा, महाभारते।२।४।१०।
"असितो देवलः सत्यः सर्पमाली महाशिराः॥"
देवगणविशेषः। यथा, मार्कण्डेये।७१।१—२
"मन्वन्तरे तृतीयेऽस्मिन् उत्तमस्य प्रजापतेः।
देवानिन्द्रानृषीन् भूपान् निबोध गदतो मम॥
स्वधामानस्तथा देवा यथानामानुकारिणः।
सत्याख्यश्च द्वितीयोऽन्यस्त्रिदशानां तथा गणः॥")

तपोलोकादूर्द्ध्वलोकः। इति विश्वः॥ अस्य विवरणं सत्यलोकशब्दे द्रष्टव्यम्॥

सत्यकं, क्ली, सत्यङ्कारः। इति केचित्॥(सत्यमेव। स्वार्थे कन्।) सत्यम्। तद्युक्ते त्रि॥ (वृष्टिवंशीयविशेषे, पुं,। यथा, भागवते।९।२४।१३।
"अनमित्रसुतो योऽन्यः शिनिस्तस्य च सत्यकः॥")

सत्यङ्कारः, पुं, (सत्यस्य कार इति। कृ+घञ्। "कारे सत्यागदस्य।" ६।३।७०। इति मुम्।) अवश्यं मयैतत् कर्त्तव्यमिति सत्याकरणम्। तत्पर्य्यायः। सत्यापनम् २ सत्याकृतिः ३। इत्यमरः॥ सत्यापना ४। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्।६।७१।
"लेभिरे निधनन्तस्मात् सत्यङ्कारात् पदातयः॥")

सत्यङ्कारकृतः, त्रि, (सत्यङ्कारेण कृतः।) अवश्यं मयैतत् कर्त्तव्यमिति सत्यं कृत्वा यद्देयम्। वायना इति भाषा। इति मिताक्षरा॥ (यथा, याज्ञवल्क्ये।२।६१।
"सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिपादयेत्॥")

सत्यतपाः, [स्] पुं, (सत्यं तपो यस्य।) मुनिविशेषः। स तु पुरा व्याध आसीत् ततस्तपः कृत्वा दुर्व्वाससो वरेण वेदादिसर्व्वशास्त्रज्ञो भूत्वा एतन्नामा बभूव। यथा,—

"तमृषिश्रेष्ठं व्याधन्तु क्षुधादुर्व्वलतां गतम्।
उवाच वेदाः साङ्गास्ते सरहस्यपदक्रमाः।
ब्रह्मविद्यापुराणानि प्रत्यक्षाणि भवन्तु ते॥
एवं प्रादाद्वरं तस्य दुर्व्वासा नाम चाकरोत्।
भवान् सत्यतपा नाम ऋषिराद्यो भविष्यति॥"
इति वाराहे सत्यतपउपाख्याननामाध्यायः॥

सत्यधृतिः, पुं, (सत्या धृतिः।) ऋषिविशेषः। यथा,—

"शरद्वतस्तु दायादमहल्या संप्रसूयते।
शतानन्दं ऋषिश्रेष्ठं तस्यापि सुमहातपाः।
तस्य सत्यधृतिर्नाम मुनिर्वेदस्य पारगः॥"
इति मात्स्ये ४८ अध्यायः॥

(सत्यशीले, त्रि। यथा, रामायणे।२।८२।६।
"रामस्तथा सत्यधृतिः सतां धर्म्ममनुस्मरन्।
नाजहात् पितुरादेशं शशी ज्योत्स्नामिवोदितः॥")

सत्यनारायणः, पुं, (सत्यो नारायणः।) देवताविशेषः। सत्यपीर इति भाषा। तस्य व्रतकथा यथा,—

"एकदा मुनयः सर्व्वे सर्व्वलोकहिते रताः।
सुरम्ये नैमिषारण्ये गोष्ठीञ्चक्रुर्मनोरमाम्॥
तत्रान्तरे महातेजा व्यासशिष्यो महायशाः।
सूतः शिष्यगणैर्युक्तः समायातो हरिं स्मरन्॥
तमायान्तं समालोक्य सूतं शास्त्रार्थपारगम्।
नेमुः सर्व्वे समुत्थाय शौनकाद्यास्तपोधनाः॥
सोऽपि तान् सहसा भक्त्या मुनीन् परमवैष्णवान्।
ननाम दण्डवद्भूमौ सर्व्वधर्म्मविदांवरः॥
वरासने महाबुद्धिस्तैर्दत्ते मुनिपुङ्गवैः।
उवास स सभामध्ये सर्व्वैः शिष्यगणैर्वृतः॥
तत्रोपविष्टं तं सूतं शौनको मुनिसत्तमः।
बद्धाञ्जलिरिमां वाचमुवाच विनयान्वितः॥
शौनक उवाच।
महर्षे सूत सर्व्वज्ञ कलिकाले समागते।
केनोपायेन भगवन् हरिभक्तिर्भवेन्नृणाम्॥
कलौ सर्व्वे भविष्यन्ति पापकर्म्मपरायणाः।
वेदविद्याविहीनाश्च तेषां श्रेयः कथं भवेत्॥
कलावन्नगतप्राणा लोकाः स्वल्पायुषस्तथा।
निधनाश्च भविष्यन्ति नानापीड़ाप्रपीड़िताः॥
प्रयाससाध्यं सुकृतं शास्त्रेषु श्रूयते द्विज।
तस्मात् केऽपि करिष्यन्ति कलौ न सुकृतं जनाः॥
सुकृतेषु विनष्टेषु प्रवृत्ते पापकर्म्मणि।
सवंशाः प्रलयं सर्व्वे गमिष्यन्ति दुराशयाः॥
स्वल्पश्रमैरल्पवित्तैरल्पकालैश्च सत्तम।
यथा भवेन्महापुण्यं तथा कथय सूत नः॥
यस्योपदेशतः पुण्यं पापं वा कुरुते जनः।
स तद्भागी भवेन्मर्त्त्य इति शास्त्रेषु निश्चितम्॥
पुण्योपदेशी सदयः कैतवैश्च विवर्ज्जितः।
पापापहविरोधी च चत्वारः केशवोपमाः॥
ज्ञानं सम्प्राप्य संसारे यः परेभ्यो न यच्छति।
ज्ञानरूपी हरिस्तस्मै प्रसन्न इव नेक्षते॥
ज्ञानरत्नैश्च रत्नैश्च परसन्तोषकृन्नरः।
स श्रेयः सुकृतिर्नूनं नररूपधरो हरिः॥
व्रतेन तपसा किंवा प्राप्यते वाञ्छितं फलम्।
सर्व्वं तत् श्रोतुमिच्छामि कथयस्व महामते॥
त्वमेव मुनिशार्दूल वेदवेदाङ्गपारगः।
त्वद्दते नहि वक्तान्यो यतस्त्वं व्यासशासितः॥
सूत उवाच।
धन्योऽसि त्वं मुनिश्रेष्ठ त्वमेव वैष्णवाग्रणीः।
यतः समस्तलोकानां हितं वाञ्छसि सर्व्वदा।
शृणु शौनक वक्ष्यामि यत् त्वया श्रोतुमिष्यते॥
नारदेनैवमुक्तः सन् भगवान् कमलापतिः।
सुरर्षये यथैवाह तत् शृणुष्व समाहितः॥*॥
एकदा नारदो योगी परानुग्रहकाङ्क्षया।
पर्य्यटन् विविधान् लोकान् मर्त्त्यलोकमुपागतम्॥
तत्र दृष्टा जनाः सर्व्वे नानादुःखसमन्विताः।
नानायोनिसमुत्पन्नाः क्लिश्यन्ते पापकर्म्मभिः॥
केनोपायेन चैतषां दुःखनाशो भवेद्ध्रुवम्।
इति सञ्चिन्त्य मनसा विष्णुलोकं गतस्तदा॥
तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम्।
शङ्खचक्रधरं देवं वनमालाविभूषितम्॥
दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे।
नारद उवाच।
नमस्ते वाङ्मनोऽतीतरूपायानन्तशक्तये।
आदिमध्यान्तहीनाय निर्गुणाय गुणात्मने॥
सर्व्वेषामादिभूताय भक्तानामार्त्तिनाशिने।
श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत॥
श्रीभगवानुवाच।
किमर्थमागतोऽसि त्वं किन्ते मनसि वर्त्तते।
कथयस्व महाभाग तत् सर्व्वं कथयामि ते॥
नारद उवाच।
मर्त्त्यलोके जनाः सर्व्वे नानाशोकसमन्विताः।
नानायोनिसमुत्पन्नाः पच्यन्ते पापकर्म्मणा॥
तत् कथं शमयेन्नाथ लघूपायेन तद्वद।
श्रोतुमिच्छामि तत् सर्व्वं कृपास्ति यदि ते मयि
श्रीभगवानुवाच।
साधु पृष्टं त्वया वत्स! लोकानुग्रहकाम्यया।
यत् कृत्वा मुच्यते मोहात् तत् शृणुष्व वदामि ते
व्रतमस्ति महापुण्यं स्वर्गे च भुवि दुर्लभम्।
तव स्नेहान्मया विप्र प्रकाशीक्रियतेऽधुना॥*॥
सत्यनारायणस्यैतद्व्रतं सम्यग्विधानतः।
कृत्वा सद्यः सुखं भुक्त्वा परत्र मोक्षमाप्नुयात्॥
तत् श्रुत्वा भगवद्वाक्यं नारदः पुनरब्रवीत्॥
किं फलं किं विधानञ्च कृतं केनेति वा व्रतम्।
तत् सर्व्वं विस्तराद्ब्रूहि कदा कार्य्यं हि तद्व्रतम्॥
श्रीभगवानुवाच।
दुःखशोकादिशमनं धनधान्यविवर्द्धनम्।
सौभाग्यसन्ततिकरं सर्व्वत्र विजयप्रदम्॥
यस्मिन् कस्मिन् दिने मर्त्त्यो भक्तिश्रद्धासमन्वितः
सत्यनारायणं देवं यजेच्चैव निशामुखे॥